गणेशद्वादशनामस्तोत्रम्

श्रीगणेशाय नमः ।।

शुक्लांम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ।।१।।

अभीप्सितार्थसिद्ध्यर्थं पूजेतो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ।।२।।

गणानामधिपश्चण्डो गजवक्त्रस्त्रिलोचनः । प्रसन्न भव मे नित्यं वरदातर्विनायक ।।३।।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।।४।।

धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः । द्वादशैतानि नामानि गणेशस्य यः पठेत् ।।५।।

विद्यार्थी लभते विद्यां धनार्थी विपुलं धनम् । इष्टकामं तु कामार्थी धर्मार्थी मोक्षमक्षयम् ।।६।।

विद्यारभ्मे विवाहे च प्रवेशे निर्गमे संकटे चैव विघ्नस्तस्य न जायते ।।७।।